**कक्षा– षष्ठी**

**विषयः –संस्कृतम्**

**समयः – सार्द्धहोराद्वयम्** **पूर्णांकाः – 60**

| | | | |
|---|---|---|---|
| **छात्रस्य नाम** | ———————— | **अनुक्रमांकः** | ———————— |
| **कक्षा एवम् अनुभागः** | ———————— | **दिनांकः** | ———————— |
| **निरीक्षकस्य हस्ताक्षरम्** | ———————— | **परीक्षकहस्ताक्षरम्** | ———————— |

---

निर्देशा–अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| (1) | अपठित–अवबोधनम् | 06 अंकाः |
| (2) | रचनात्मकं लेखनम् | 12 अंकाः |
| (3) | अनुप्रयुक्तं व्याकरणम् | 18 अंकाः |
| (4) | पठित–अवबोधनम् | 24 अंकाः |

**खण्डः–क अपठित–अवबोधनम् ( 6 अंकाः)**

प्र.1. निम्नलिखित गद्यांश पठित्वा प्रश्नानां उत्तराणि लिखत।

एकस्मिन् वने एकः श्रृगालः प्रतिवसति स्म। सः बहु चतुरः आसीत्। स प्रतिदिनं भोजनाय वने इतः ततः भ्रमति स्म।तस्मिन् वने एकः वानरः अपि वसति स्म।तयोः मित्रता अभवत्। एक वारं तौ नदीम् अगच्छताम्। नद्याः जलं शीतलम् आसीत्। तस्मिन् जले बहवः मत्स्याः अपि निवसन्ति स्म।

(क) एकपदेन उत्तरत– (1/2x4=2)

(1) वने कः प्रतिवसति स्म ?

(क) काकः (ख) मक्षिका

(ग) श्रृगालः (घ) मण्डूकः

(2) श्रृगालस्य मित्रं कः आसीत् ?

(क) वानरः (ख) कपोतः

(ग) शशकः (घ) मत्स्याः

(3) श्रृगालः प्रतिदिनं किमर्थं भ्रमति ?

(क) स्नानाय (ख) भोजनाय

(ग) खेलनाय (घ) कूर्दनाय

(4) नद्याः जलं कीदृशं आसीत् ?

(क) शुद्धं (ख) शीतलम्

(ग) दूषितं (घ) पवित्रं

(ख) पूर्णवाक्येन उत्तरत– (1x2=2)

(1) कः बहु चतुरः आसीत् ?

उत्तरम् ..................................................................................................................................

(2) नदीजले के निवसन्ति स्म ?

उत्तरम् ..................................................................................................................................

(ग) भाषिककार्यम् – (1/2x4=2)

(1) "वने एकः वानरः वसति स्म" अत्र क्रियापदं किम् ?

(क) वानरः (ख) वने

(ग) एकः (घ) वसति स्म

(2) 'शत्रुता' इति पदस्य विलोम पदं चित्वा लिखत ?

(क) कटुता (ख) प्रियः

(ग) मित्रता (घ) दृष्ट्वा

(3) "जलम्" इति पदस्य समानार्थक पदं चित्वा लिखत–

(क) दुग्धम् (ख) नीरम्

(ग) सूपम् (घ) अग्नि

(4) जले के निवसन्ति स्म ?

(क) सर्पः (ख) मत्स्याः

(ग) बकः (घ) काकाः

## खण्ड–ख रचनात्मकं लेखनम् (12 अंकाः)

प्र.2. वचनानुसारं रिक्तस्थानानि पूरयत– (1/2x10=5)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | मन्दिरे | मन्दिरयोः | मन्दिरेषु |
| | दिवसे | .................. | .................. |
| . | .................. | स्थलयोः | .................. |
| | क्षेत्रे | .................. | .................. |

| | | |
|---|---|---|
| .................. | पुष्पयोः | .................. |
| रामे | .................. | .................. |

प्र.3. उदाहरणानुसारं पदानि रचयत– (1/2x6=3)

| | लोट्लकारः | लट्लकारः |
|---|---|---|
| | तरतु | तरति |
| 1. | पश्यतु | .................. |
| 2. | क्रीडतु | .................. |
| 3. | हसतु | .................. |
| 4. | नन्दतु | .................. |
| 5. | गच्छतु | .................. |
| 6. | पठतु | .................. |

प्र.4. चित्राणि दृष्टवा संख्या लिखत– (1x4=4)

षट्, दश, एकम्, अष्ट

(क)



.................. पुस्तकम्

(ख)



.................. तालाः।

(ग)



.................. पर्णानि

(घ)



.................. कन्दुकानि

## खण्डः—ग अनुप्रयुक्तम् व्याकरणम् (18 अंकाः)

प्र.5. (अ) उदाहरणानुसारेण प्रश्नानां उत्तराणि लिखत (1/2x4=2)

(1) यथा – चन्द्रः – चन्द्र!

(क) शिष्यः – ..............................

(ख) रामः – ..............................

(2) यथा – फलम् – फल!

(क) मित्रम् – ..............................

(ख) पुस्तकम् – ..............................

(ब) विलोमपदानि लिखत – (1/2x6=3)

| प्रविशति, सेवकः, मूर्खः, नेतुम्, नीचैः, दुःखितः |
|---|

(क) चतुरः – .............................. (ख) आनेतुम् – ..............................

(ग) स्वामी – .............................. (घ) निर्गच्छति – ..............................

(ङ) प्रसन्नः– .............................. (च) उच्चैः – ..............................

प्र.6. अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत– (1x3=3)

( इव, अपि, च )

(क) अहं पठामि, त्वम् ............................. पठ ।

(ख) बकः हंसः ............................. श्वेतः ।

(ग) बालकाः, बालिकाः ...................... क्रीडाक्षेत्रे क्रीडन्ति ।

प्र.7. कोष्ठकेषु प्रदत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि रचयत– (1x5=5)

(क) ......................... सैनिकाः सन्ति। (शिविर)

(ख) ......................... कच्छपाः सन्ति। (तडाग)

(ग) यानानि ......................... चलन्ति। (राजमार्ग)

(घ) ........................ मीनाः सन्ति। (सरोवर)

(ङ) बालाः ...................... क्रीडन्ति। (क्रीडाक्षेत्र)

प्र.8. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानि पूरयत– (1x5=5)

(क) ........................ आभूषणं विद्या। (नरात्/नरस्य)

(ख) ........................ जनसंख्या। (नगरम्/नगरस्य )

(ग) सुधा ........................ धनम् आनयति। (कोषात्/कोषेण)

(घ) गंगा .......................... प्रभवति। (हिमालयस्य/हिमालयात्)

(ङ) ....................... जलं निर्मलम्। (अलकनन्दायाः/अलकनन्दया)

**खण्ड–घ पठित–अवबोधनम् (24 अंकाः)**

प्र.9. निम्नलिखितं गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत–

उत्सवप्रियः भारतदेशः। अत्र कुत्रचित् शस्योत्सवः भवति, कुत्रचित् पशूत्सवः कुत्रचित् यानोत्सवः।

एतेषु एव अस्ति अन्यतमः पुष्पोत्सवः इति। अयं "फूलवालों की सैर" इति नाम्ना प्रसिद्धः अस्ति। देहल्याः मेहरौलीक्षेत्रे ऑक्टोबरमासे अस्य आयोजनं भवति। अस्मिन् अवसरे तत्र बहुविधानि पुष्पाणि दृश्यन्ते।

(क) एकपदेन उत्तरत– (1/2x2=1)

(1) अस्माकं भारतदेशः कीदृशः अस्ति ?

(क) लोकप्रियः (ख) धार्मिकः

(ग) उत्सवप्रियः (घ) महान्

(2) उत्सवेषु अन्यतमः उत्सवः कः ?

(क) यानोत्सवः (ख) पशूत्सवः

(ग) धार्मिकोत्सवः (घ) पुष्पोत्सवः

(ख) पूर्णवाक्येन उत्तरत– (1x2=2)

(1) पुष्पोत्सवः केन नाम्ना प्रसिद्धः अस्ति ?

उत्तरम् ..........................................................................................................................

(2) पुष्पोत्सवस्य आयोजनं कदा भवति ?

उत्तरम् ..........................................................................................................................

(ग) भाषिककार्यम् – (1x2=2)

(1) "तत्र बहु विधानि पुष्पाणि दृश्यन्ते" अत्र क्रियापदं किम् ?

(क) पुष्पाणि (ख) दृश्यन्ते।

(ग) तत्र (घ) बहुविधानि

(2) "पुष्पोत्सवः"इति पदस्य सन्धि विच्छेदं कुरुत।

(क) पुष्पोत् + सवः (ख) पुष्प + उत्सवः

(ग) पुष् + पोत्सवः (घ) पुष्पो + त्सवः

प्र.10. पद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत।

गृहं जीर्णं न वर्षासु वृष्टिं वारयितुं क्षमम् ।
तथापि कर्मवीरत्वं कृषिकाणां न नश्यति ।।
तयोः श्रमेण क्षेत्राणि सस्यपूर्णानि सर्वदा ।
धरित्री सरसा जाता या शुष्का कंटकावृता ।।

(क) एकपदेन उत्तरत – (1x2=2)

(1) कृषिकाणां गृहं कीदृशं अस्ति ?

(क) सुन्दरं (ख) जीर्णं

(ग) भव्यम् (घ) विपुलम्

(2) श्रमेण का सरसा भवति ?

(क) आकाशः (ख) सूर्यः

(ग) धरित्री (घ) वृष्टि

(ख) पूर्णवाक्येन उत्तरत– (1x1=1)

(1) केषां कर्मवीरत्वं न नश्यति ?

उत्तरम् ..............................................................................................................................

(ग) भाषिककार्यम् – (1x2=2)

(1) "जीर्णं" इति पदस्य समानार्थकपदं चिनुत ।

(क) पिपासा (ख) अधिकः

(ग) सुन्दरं (घ) जर्जरम्

(2) "वृष्टिः"इतिपदस्य हिन्द्या अर्थंचिनुत ।

(क) मिठाई (ख) वर्षा

(ग) फसल (घ) अन्न

प्र.11. शुद्ध कथनानां समक्षं (✓) इति अशुद्धकथनानां समक्षं (✗) कुरुत– (1x4=4)

(क) दशबालकाः स्नानाय अगच्छन् । ☐

(ख) ते वस्तुतः नव बालकाः एव आसन् । ☐

(ग) एकः बालकः नद्यां मग्नः । ☐

(घ) बालकः स्वं अगणयत् । ☐

प्र.12 मंजूषातः उपयुक्तानां अव्ययपदानां प्रयोगेण रिक्तस्थानानि पूरयत– (1/2x4=2)

| कुत्र, कदा, कथं, किम् |
|---|

(क) वर्षाकाले मयूराः........................ कुर्वन्ति ।

(ख) त्वं .............................. पुरीं गमिष्यति ।

(ग) जगन्नाथपुरी ................................ अस्ति ।

(घ) तव स्वास्थ्यं ............................ अस्ति ।

प्र.13. श्लोकांशान् योजयत् – (1/2x4=2)

| | | |
|---|---|---|
| (क) | गृहं जीर्णं न वर्षासु | या शुष्का कंटकावृता । |
| (ख) | पादयोर्न पदत्राणे | तौ तु क्षेत्राणि कर्षतः । |
| (ग) | धरित्री सरसा जाता | वृष्टिं वारयितु क्षमम् । |
| (घ) | हलेन च कुदालेन | शरीरे वसनानि नो । |

प्र.14. पर्यायपदानि योजयत – (1/2x4=2)

(क) वसनानि जर्जरम्

| | | |
|---|---|---|
| (ख) | जीर्णम् | रविः |
| (ग) | तृषा | वस्त्राणि |
| (घ) | सूर्यः | पिपासा |

(1) .................................................. .......................................................... ।

(2) .................................................. .......................................................... ।

(3) .................................................. .......................................................... ।

(4) .................................................. .......................................................... ।

प्र.15. अधोलिखितानि पदानि आधृत्य सार्थकानि वाक्यानि रचयत– (1x4=4)

| | | |
|---|---|---|
| वानराः | वृक्षेषु | नृत्यन्ति |
| सिंहाः | वनेषु | कूर्दन्ति |
| मयूराः | उद्याने | उत्पतन्ति |
| मत्स्याः | जले | गर्जन्ति |
| खगाः | आकाशे | तरन्ति |

यथा – वानराः वृक्षेषु कूर्दन्ति

(1) .................................................................................................................... ।

(2) .................................................................................................................... ।

(3) .................................................................................................................... ।

(4) .................................................................................................................... ।